श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीपुरुषोत्तमषोडशी ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीपुरुषोत्तमषोडशी ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः ॥

वेला काचित् सेव्या
    नीलाचलमण्डिता जगति।
शैलाकारो भगवान्
    मालाकारादिपूजितो यत्र ॥ 1 ॥

वेलावने पूर्वमहापयोधेः
    नीलाचले कल्पितसन्निधानम्।
तालाङ्कभद्रासहितं हिताय
    कालाम्बुदाभं शरणं प्रपद्ये ॥ 2 ॥

नीलाम्बरेण हलिनाऽथ सुभद्रया च
    नीलाम्बुदौघनिभया निजया च मूर्त्या।
नीलादियौवतमनोरथकल्पवल्ल्या
    नीलावनीधरवरे विहरन्तमीडे ॥ 3 ॥

पद्मावतीचेलवराञ्चलेन
    विलोचनान्तं परिमृष्टवन्तम्।
स्नेहाभिषिक्तं जयदेवरूपं
    नीलाचलेन्द्रं न जहाति चेतः ॥ 4 ॥

जयदेवकवीन्द्रभारतीपदविन्यासवशीकृताशयः।
इह नृत्यसि किं प्रभो ! न चेत्कथमेतन्नु करप्रसारणम्॥ **5**॥

गायन्तीं जयदेवभव्यभणितिं काष्ठाहृतौ कानने
नारीं काञ्चन कण्टकैरतितरां विद्धाङ्गजातो मुहुः।
पद्भ्यां दूरमनुव्रजन् रसिकतां योऽदर्शयत्तादृशीं
तं त्वां नीलधराधरेन्द्रनिलयं नित्यं मतिश्चुम्बति॥ **6**॥

पुरुषोत्तमपुण्यदेशगः परमं ब्रह्म भवान्न संशयः।
अकरोऽत्र ददाति वाञ्छितान्यपदो याति रथाय सद्म नः॥ **7**॥

पदमानतभक्तमानसे भवता नूनमभून्निवेशितम्।
अत एव न दृश्यते पदं कमलद्वन्द्वविशेषकोमलम्॥ **8**॥

विपदा विकला न पाण्डवाः समितौ सन्तु तदर्थमस्म्यहम्।
इति किं पुरुषोत्तमस्थले भगवन्नेवमभूः कृपाभरात्॥ **9**॥

तव नाम बिभर्ति यो जनः जगतां नाथ सभक्तिरेष सः।
सृजते मधुरां हि भारती स यथा पण्डितराजनायकः॥ **10**॥

अयि ! पावन ! मङ्गल ! प्रभो ! दयया त्वं मनसि स्थितो मम।
अतिपातककर्मसादरं कथमेवं कथयेदमच्युत॥ **11**॥

पतितपावनस्त्वं यतस्ततः
प्रकटयन्निदं चेष्टसे तथा।
मुदमथो मदं याम्यहं हरे
तव यशो मया तादृगेधते॥ **12**॥

रथैस्त्रिभिरलङ्कृतामतिविशालमध्यावनिं
अनौघपरिपूरितां नयनमोदसंवर्धिनीम्।

अनेकविधयानकैरपि तुरङ्गमातङ्गकैः
महापणगणैर्वृतां सुभगपूरिवीथीं भजे ॥ **13** ॥

भटपङ्क्तिमध्यदेशे
नटनं कुर्वन्निवायमायाति।
घटयितुमानन्दं नः
विटकुलपतिरेष नीलशैलेन्द्रः ॥ **14** ॥

किरीटी पुष्पौघैः जननयनबृन्दं सफलयन्
रथोपर्यारोढुं रचितगमनो वाद्यनिवहैः।
मुहुर्द्वारि द्वारि स्थितिमुपगतः कामपि शुभां
जगन्नाथस्स्पृष्टस्सकलदुरितान्ताय भगवान् ॥ **15** ॥

श्रीकामपालानुज ! कामतात !
श्रीकाम ! नीलाचलकालमेघ !।
कामैकसक्तं तव पादकामं
कामं कुरुष्वैनमतीव दीनम् ॥ **16** ॥

पुरुषोत्तमषोडशिस्तुतिं
पुरुषः श्रीनिधिराघवोदिताम्।
पुरुषोत्तमसूक्तिगर्भितां
पुरुषेषूत्तमतां व्रजेत्पठन् ॥ **17** ॥

॥ इति श्रीपुरुषोत्तमषोडशी समाप्ता ॥